# 78 - अष्टसप्ततितम दशकम्
# द्वारकावासः, रुक्मिणी सन्देश प्राप्तिः च

त्रिदश वर्धकि वर्धित कौशलं त्रिदश दत्त समस्त विभूतिमत् ।
जलधि मध्य गतं त्व मभूषयः नवपुरं वपु रञ्चित रोचिषा ॥ ॥78-1॥

ददुषि रेवत भूभृति रेवतीं हलभृते तनयां विधि शासनात् ।
महित मुत्सव घोष मपूपुषः समुदितैर् मुदितैस् सह यादवैः॥ ॥78-2॥

अथ विदर्भ सुतां खलु रुक्मिणीं प्रणयिनीं त्वयि देव सहोदरः ।
स्वय मदित्सत चेदि महीभुजेस्व तमसा तमसाधु मुपाश्रयन् ॥ ॥78-3॥

चिर धृत प्रणया त्वयि बालिका सपदि काङ्क्षित भङ्ग समाकुला ।
तव निवेदयितुं द्विज मादिशत् स्व कदनं कदनङ्ग विनिर्मितं ॥॥78-4॥

द्विज सुतोऽपि च तूर्ण मुपाययौ तव पुरं हि दुराश दुरासदम् ।
मुद मवाप च सादर पूजितः स भवता भवताप हृता स्वयम् ॥ ॥78-5॥

स च भवन्त मवोचत कुण्डिने नृप सुता खलु राजति रुक्मिणी ।
त्वयि समुत्सुकया निज धीरताः अहितया हि तया प्रहितोऽस्म्यहम्॥78-6॥

तव हृताऽस्मि पुरैव गुणै रहं हरति मां किल चेदि नृपोऽधुना ।
अयि कृपालय पालय मामिति प्रजगदे जग देक पते तया ॥॥78-7॥

अशरणां यदि मां त्व मुपेक्षसे सपदि जीवित मेव जहाम्यहम् ।
इति गिरा सुतनो रतनोत् भृशं सुहृदयं हृदयं तव कातरम् ॥॥78-8॥

अकथयस् त्व मथैन मये सखे तदधिका मम मन्मथ वेदना ।
नृप समक्ष मुपेत्य हराम्यहं तदयि तां दयिता मसितेक्षणाम् ॥॥78-9॥

प्रमुदितेन च तेन समं तदा रथ गतो लघु कुण्डिन मेयिवान् ।
गुरु मरुत्पुर नायक मे भवान् वितनुतां तनुतां निखिला पदाम् ॥78-10॥